International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# शाकुन्तले मनसो दर्शनं वैपरीत्यञ्च

**Sajan Guha**

PhD Research Scholar, Raiganj University

**पश्चिमबङ्गः**

भूमिका- मनुष्यस्य मनो द्विविधम्। प्रथमं बाह्येन अनुशासितं, द्वितीयन्तु बाह्यजगतः शासकरूपम्। बाह्येन कस्यापि मनो विचलितं भवति कस्यापि वा न। एकस्य मनः शक्तियुक्तं दृढतासम्पन्नञ्च। अन्यच्च तद्विपरीतम्। मनसोऽवबोधनार्थं मनुष्यचरित्रस्य ज्ञानार्जनमत्यावश्यकम्। मनसा सह चरित्रस्य सम्बन्धं घनिष्ठमेव वर्तते। मनसश्चित्रं चरित्रे प्रतिफलितं भवति। सङ्कल्पविकल्पात्मकं मन इति पण्डितैः न्यरूपि। विकल्पात्मिका वृत्तिर्नाम विपरीतवृत्तिः। चिन्तनेषु वैपरीत्यं मनसो वैशिष्ट्यमेकम्। चिन्ता रुच्यनुयायिनी वर्तते। चरित्रस्य भिन्नत्वे रुचयोऽपि भिन्नाः। रुचिनां प्रतिफलनं चरित्रे वर्तते। मनसो वैपरीत्यं दर्शनञ्चापि चरित्रैः प्रतिफलितं भवति। कालिदासः स्वकीये चरित्रप्रधाने अभिज्ञानशकुन्तलनाटके मनसः एतादृशं माहात्म्यं प्रणिनाय।

**शाकुन्तले मनः** दर्शनम्- कालिदासेन कृतमभिज्ञानशकुन्तलं नाटकं नायकप्रधानम्।

यद्यपि अत्र शकुन्तला न्यूनतां न भजते तथापि दुष्यन्तः प्रधानमेव। कालिदासेन ग्रथितं दुष्यन्तस्य चरित्रमिन्द्रियशासनाधीनम्। एकत्र स पुरुवंशीयराजा अन्यत्र च विलासविद्वेषी। वीरोचितकार्ये व्यापृतः सन् रविकिरणसहिष्णु स राजा सधनु शारीरिकसुखमतिक्रम्य स्थानात् स्थानान्तरं पर्य्यटति। सेनापति उक्तवान्-
अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नम।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं विभर्ति॥[1]
अनेन श्लोकेन कालिदासः पुरुषाकारपूर्णस्य दुष्यन्तस्य चित्रं प्रणिनाय। परन्तु एतद् बाह्यम्। यतोहि तदा दुष्यन्तस्य मनश्चित्रं भिन्नमासीत्। वयं पश्यामो यद्यदा सेनापतिः दुष्यन्तस्य बलवीर्य्यं प्रशंसति तदा दुष्यन्तस्य मनः शकुन्तलाविरहे व्याकुलं भवति। व्याकुलतेयं कालिदासेन अभिव्याहारि-
कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते॥[2]

[1] अभिज्ञानशकुन्तलम्- २।४
[2] तत्रैव- २।१

एवमेव स राजा विरहयन्त्रणायामाकुलो भवति। परन्तु आश्चर्यविषयोऽयं यद् राज्ञो बलवीर्यस्य प्रशंसाकृतवता सेनापतिना सा यन्त्रणा न पर्यज्ञायि दुष्यन्तस्य चरित्रे मुखावयवे वा। अतो मन्ये कालिदासस्य दुष्यन्तो न केवलं कर्मवीरोऽपि तु चित्तवीरः। स न केवलं रविकिरणसहिष्णु मनःसंयमेऽपि स जितेन्द्रियः। शाकुन्तलनाटके सर्वत्र मनःसंयमस्य एतादृशं चित्रं कालिदासेन प्राकाशि।

प्रथमेऽङ्के ससखी शकुन्तला पुष्पानि चिनोति जलसेचनमपि करोति। दुष्यन्तोऽपि सर्वान् पश्य मुग्धो भवति। शकुन्तलां पश्य तस्य मनसि कामनायाः भावोऽपि शनैः शनैः प्रज्ज्वलितः। यतोहि शकुन्तला तदा भ्रमरेण आक्रान्ता भवति। दुष्यन्तो मनसि अचिन्तयत्-

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिवसि रतिसर्वस्वमधरं
वयं तत्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥[3]

अतीव दुरतिक्रमणीयो भावोऽयम्। अनेन भावेन मनसो वैकल्यं सर्वदा जायते। परन्तु धन्यो भवति दुष्यन्तस्य मनःसंयमस्तस्य आत्मजयो वा। अस्यामवस्थायामपि तस्य किञ्चिद्भावविभङ्गो न वर्तते। प्रियंवदाऽपि स्वीकरोति यत्-“अनसूये, को नु खलु एषः चतुरगम्भीराकृतिः चतुरं प्रियमालपन् प्रभाववान् इव लक्ष्यते”[4] इति। तृतीयोऽङ्के शकुन्तला सन्तापेन जर्जरिता। दुष्यन्तहीना सा मृता इव-“अन्यथा अवश्यं सिञ्चतं मे तिलोदकम्”[5] इति। दुष्यन्तस्यापि तादृशी अवस्था दृश्यते। अनन्तरं तयोः मिलनं भवति। परन्तु गुरुजनस्य समागमाशङ्कायां मिलनमपर्याप्तं स्यात्। दुष्यन्तः सनिःश्वासं कथयति-“अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः”[6] इति। परन्तु दूराद् रक्षःपीडितानां तपस्वीनां भयार्तस्वरमाकर्ण्य “अयमहमागच्छामि”[7] इति वदता स्थिरगम्भीरस्वरैः राक्षसवधाय कर्तव्यकरणाय च निष्क्रामति दुष्यन्तः। तदा तस्य मनसि शकुन्तलायाः चिन्ता लेशमात्रमपि नास्ति। आश्चर्योऽयं पुरुषो धन्यस्तस्य मनःसंयमः। आत्मगतभावना सत्त्वेऽपि तस्य मनसि सार्वजनीनताऽपि अस्ति।

पञ्चमेऽङ्के प्रत्याख्यानदृश्येऽपि दुष्यन्तस्य मनःदर्शने वैचित्र्यं स्फुरितम्। शापप्रभावाद्दुष्यन्तोऽधुना विस्मृतचित्तः। परन्तु यैः रूपराशिभिः दुष्यन्तो मोहाभिभूतः अभवत् ते राशयोऽद्यापि दुष्यन्तं निकषा दण्डायमानाः सन्ति। अद्यापि ते दुष्यन्तस्य चित्तं हरन्ति। यथा- का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।

---

[3] तत्रैव - १।२१
[4] तत्रैव - १
[5] तत्रैव -३
[6] तत्रैव -३
[7] तत्रैव -३

मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्॥[8]

तथापि रूपराशिसम्पन्ना अनाघ्राता शकुन्तला तेन प्रत्याखाता। तदा शकुन्तलापि तं दुषितवती। शार्ङ्गरवोऽपि तमग्निवच्छासितवान्। ऋषेः क्रोधाग्नि कीदृशो भवतीति दुष्यन्तः सम्यग् जानाति। द्वितीयेऽङ्के स स्वयमेव उक्तवान् यत्-

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्य्यकान्तस्तदन्यतेजोऽभिभवाद् वमन्ति॥[9]

अधुना एषः क्रोधाग्निः स्वयमेव तं दहति। परन्तु राजा तदा विगतभयः। यद्यपि स धर्मानुरागी राजर्षि तथापि स जानाति यत् परस्त्रीग्रहणे धर्मविपर्ययो भवति। स एव धर्मवीरः। यत्र धर्मविपर्य्ययो भविष्यति तत्र भुवनमोहिनी रमणी तुच्छा अग्निवद् ऋषेः वचनमपि तुच्छम्। महानयं राज्ञो धर्मानुरागः। महदिदं राज्ञो मनसो दर्शनम्। रूपदर्शनादनन्तरं स मनसि रूपजमोहमनुभवति परन्तु मोहान्धकारस्तं वशीकर्तुमक्षमो भवति। कामजभावनां वशीकरणेन स बाह्यसंसारस्योपरि प्रभुत्वविस्तारे सक्षमः। अनेन तस्य जयो भविष्यति। एवं कवि कालिदासोऽपि जयी।

षष्ठेऽङ्के दुष्यन्तः पुनः पुनः अङ्गुरीयदर्शनमाध्यमेन विह्वलो भवति। शकुन्तलास्मरणेन तस्य मनसि अनुतापः प्रादुर्भवति। तदा स आमोदप्रमोदवियुक्तः सन् अनुतापानले सन्तप्तो भूत्वा मुर्च्छितप्रायो भवति। तस्मिन् काले विपन्नस्य भयार्त्तरवे तस्य कर्तव्यभावना जागरिता भवति। तदा न शकुन्तलाचिन्ता तस्य अस्ति न वा शकुन्तलाजनितं शरीरदौर्बल्यम्। यद्यपि स दुष्यन्तः स्वसुखदुःखेषु विगतस्पृहो भविष्यति तथापि अनतिक्रमणीयनियतिवशाद् येषां हृदयानां भारः तस्योपरि वर्तते तेषां सर्वेषां सुखदुःखविस्मरणे स नितान्तोऽक्षमो भवति। अत्रापि दुष्यन्तस्य दुष्यन्तत्वं तस्य मनसो वैचित्र्यं वा यत्तु मेघोदरात् विनिर्मुक्तः रविरिव सगौरवेनोद्भासितम्।

रमणीरत्नरूपेण प्रसिद्धा शकुन्तला सुरयुवतिसम्भवा विधिना "चित्रे निवेश्य परिकल्पितसत्त्वयोगा"[10] अनाघ्राता अखण्डं पुण्यानां फलमिव। नवप्रस्फुटिता मल्लिका यथा कोमला शकुन्तलापि तथैव कोमला। अतः तपोवने जलसिञ्चनकर्मणि रता शकुन्तला स्वल्पश्रमेण व्याकुला भवति। अतिसामान्यश्रमेण शकुन्तलापुस्पं स्खलितं भवति। तां शकुन्तलां तपोवनरक्षाकार्ये नियुज्य महर्षिकण्वः स्वस्य अदूरदर्शितां प्रमाणकर्तुमिच्छतीति कालिदासेन निरमायि-

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥[11]

[8] तत्रैव - ५।१३
[9] तत्रैव - २।७
[10] तत्रैव - २।९
[11] तत्रैव - १।१७

दुष्यन्त एव शमीवृक्षो नीलोत्पलपत्रं तु शकुन्तला। जगति बलविषये स्त्रीपुरुषयोः पार्थक्यं विद्यते। कर्मणो मूलं शरीरबलम्। अतो जगति कर्मक्षेत्रे आधाररूप एव पुरुषो न रमणी। परन्तु शकुन्तला यद्यपि बलहीना तथापि बलिष्ठा। क्षुद्रकलसस्य भारोत्तलनकार्ये वृक्षेषु जलसिञ्चनकर्मणि वा सा बलशून्या भविष्यति परन्तु शुकपक्षिण उदरस्तुल्ये कोमलहृदये प्रवलं दुःखभारं गृहीत्वा पत्या सह मिलनाकाङ्क्षायां सुदीर्घमार्गस्यातिक्रमणकार्येऽपि सा न क्लान्ता। आश्रमाद् हस्तिनापुरस्य दूरत्वं वर्तते। मार्गोऽपि अरण्ये परिपूर्णः। सूर्योऽपि प्रचण्डोऽसहनीय इति शार्ङ्गरवेन व्याधायि-"भगवान् दूरमधिरूढ"[12] इति। परन्तु शकुन्तला अस्मिन् असहनीये दिवसेऽपि रविकिरणसहिष्णू सती मध्याह्ने राजभवने उपस्थिता अभवत्। एतदेव तस्या मनसः प्राबल्यं येन तपोवनरक्षाकार्ये नियुक्ता बलहीनापि शकुन्तला प्रियामिलनाय अतिदूरमार्गोऽतिक्रमणे बलिष्ठा। अनन्तरं सा दुष्यन्तस्य वाक्यवाणैः जर्जरिता। परन्तु तस्या मनसि कोमलता नासीच्छरीरे विश्रान्ति नासीत्स्वेद्विन्दवोऽपि नासन्।

तदा सा शकुन्तला मातृपदे अधिरूढा। अतः कोमलतमाऽपि काठिन्येन परिपूर्णा। बलहीनाऽपि बलिष्ठा। श्रमक्लान्ता अपि कष्टसहिष्णू। सा एव सृष्टेः रहस्येन आवृता। इयं शकुन्तला हृदयगुणैः बलिष्ठाऽपि हृदयदौर्बल्येन कार्येष्वक्षमा। नाटके दुष्यन्तो राजधानीं प्रत्यागतवान्नपि च राजधर्मानुसारं राजकार्ये आत्मानं व्यापृतवान्। परन्तु नेति शकुन्तला। सा सर्वान् कार्यान् विस्मृत्य प्रस्तरनिर्मितमुर्त्तिरिव दुष्यन्तं सर्वदा भावितवती। तस्या बाह्यभावना एतादृशा प्रबला आसीत् यत् कर्तव्यरूपिणः दुर्वाससः "अयमहं भो"[13] इति वाणी अपि सा न श्रुतवती। यतोहि दुष्यन्तचिन्तामग्ना सा बाह्यान् विस्मृतवती। मानवात्मा यथा परमात्मनि एकीभूतं भवति सा अपि शकुन्तला तथैव हृदयसर्वस्वा सती दुष्यन्ते एकीभूता भवति। तदर्थमभिशापोऽयम्-

विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥[14]

परन्तु मनोमुग्धा शकुन्तला अभिशापसत्त्वेऽपि मनोमुग्धैव तिष्ठति। बाह्यजगत् पूर्ववत्तां पुरतो विलुप्तमिव प्रतिभाति। यैः मनोगुणै रमणी चेष्टाशीला तैरेव गुणैः सा निश्चेष्टा। मन एव नार्य्यः प्रधानमुपादानम्। मनोगुणैरेव सा पुरुषेभ्यो भिन्ना। मनसः प्राबल्यवशात् शकुन्तलायाः समीपस्थितं बाह्यजगत् सर्वदा शून्यमिव परन्तु तस्यैव मनसो वैकल्यवशाद् दुरस्थितं दुष्यन्तस्य चित्रमपि हृदये प्रत्यक्षाकारेण वर्तते। यथा सिद्धकामस्य योगिनो मनसि परमात्मा प्रत्यक्षतया प्रादुर्भवति परन्तु सम्मुखस्थं जगत् अप्रत्यक्षतया सङ्गाहीनं भवति तद्वत् शकुन्तलाचित्तेऽपि। एवं मनोगुणैः शकुन्तला योगीव प्रत्यक्षानुरागिनी प्रत्यक्षापेक्षिणी शोके विरहे च अन्तर्लीनप्रिया। अतः शकुन्तला स्त्रीणामन्तर्लीनमुर्त्तिः। अन्तर्लीनता भावेन बर्द्धते। प्रियतमचिन्तनकार्ये आत्मविस्मृतिर्हि भावस्य उत्कर्षतायाः कारणम्। स भावः कुण्डलिनीशक्तिरिव हृदये प्रसुप्तो भवति।

---

[12] तत्रैव - ४

[13] तत्रैव - ४

[14] तत्रैव - ४।१

चतुर्थेऽङ्के सा एव विगलितहृदया कोमलप्राणा शकुन्तला दृढेण मनसा पितुरुद्देश्ये सान्तनावाक्यं निक्षिपति। पुरुषप्रधानो दृढमनः कण्वस्तदा विगलितहृदयः क्षुद्रशिशुः इव प्रतिभाति। धन्यं इदं रमणीमनो यस्य समीपे जितेन्द्रियपुरुषोऽपि कण्वोऽवनतो भवति। तन्मनः कोमलमपि दृढतायुक्तम्। कोऽस्य रहस्योन्मोचने शक्यः? धन्यमिदं शकुन्तलामन यत्र बाह्यविस्मृतिर्यथैव गभीरतया दृश्यते तथैव प्रखरतया दृश्यते बाह्यानुभूतिः। तस्या बाह्यज्ञानस्य पूर्णतया लोपेऽपि तीव्रता दृश्यते। यथा- शकुन्तला शापध्वनिसत्त्वेऽपि अविचला परन्तु भ्रमरेण व्याकुला। अत्राशयो विद्यते यत्- प्रियतमो मनुष्यः नारीहृदयेषु सर्वत्रैव विराजते। तस्या मनसि न अन्यस्य चिन्ता किञ्चिदपि न वर्तते। अपि तु प्रियतमस्य चिन्तनकार्ये नार्य्य आत्मविस्मृतिर्दृश्यते। परन्तु यं प्रति नार्य्यो भावावेगो न जायते स सर्वदा असहनीयः। यतोहि सा हृदयप्रधाना। शकुन्तलाऽपि एतादृशी वर्तते। यदा हृदयप्रियकार्यं भविष्यति तदा प्रतिबन्धको नास्ति न वा तत्र शुभाशुभविचारः कर्तव्यः। अतः रमणीमनसि अन्तर्लीनता यथा सुदृढा तथैव बाह्यनुभूतिरपि इति सिद्धान्तः।

शाकुन्तले मनसो वैपरीत्यम्- दर्शनेषु दर्शनीयतमं भवति मनः। तत्र रम्यं कालिदासस्य मनःसम्भूतमभिज्ञानशकुन्तलम्। सांख्यशास्त्रोक्तं प्रकृतिपुरुषयो एकीभूतं तत्त्वमत्र सर्वत्रैव प्रतिभाति। दुष्यन्तः पुरुषश्रेष्ठः। शकुन्तला नारीरूपेण श्रेष्ठा प्रकृतिः। यद्यपि पुरुषप्रधानम् अभिज्ञानशकुन्तलं तथापि स पुरुषो नार्य्यः पदतले पतितः सप्तमेऽङ्के। तच्चित्रं सर्वथा शक्तिवादे अङ्कितं महादेवस्य वक्षारूढायाः कालीदेव्याः रूपकल्पनायाम्। शकुन्तला अपि विरहकातरा सती राज्ञश्चिन्तायां रता भवति। अर्थात् प्रकृति न कदापि परमचैतन्यपुरुषविहीना तिष्ठति। यथा कालीदेवी कुण्डलिनीरूपया महादेवमावृत्तिमाध्यमेन सदा परमचैतन्ययुक्तैव तिष्ठति तथा शकुन्तलाऽपि। तथापि प्रकृतिपुरुषयोः यथा भेदोऽस्ति तथा तयोः मनसि वैपरीत्यमस्ति। दुष्यन्तस्य मनस्तु बाह्यार्थः प्रधानम्। नार्य्यास्तु आभ्यन्तरोऽर्थः प्रधानम्। दुष्यन्तः शरीरबलेन बलिष्ठः। शकुन्तला हृदयबलेन बलिष्ठा। दुष्यन्तस्य मनः सर्वदा कर्मक्षमम्। परन्तु शकुन्तलायाः मनो हृदयवेगेन सामर्थ्ययुक्तं सत् कर्मक्षमम्। अतः कर्मणि सामर्थ्यं पुरुषस्य मनःसु स्वाभाविकधर्मरूपम्। परन्तु रमणीविषये अवस्थासापेक्षधर्मरूपम्। परन्तु यदा रमणी अस्या अवस्थायाः सम्मुखीना भविष्यति तदा तया सह पुरुषस्य न कोऽपि भेदो दृश्यते। तदा कोमलतमं नीलोत्पलपत्रमिव नार्य्या मनोऽपि शमीवृक्षवद्भवति। शकुन्तलायाः मनसः एतादृशं काठिन्यं सर्वदा कालिदासेन प्राकाशि तदीये नाटके। दुष्यन्तः स्वचरित्रविस्तारेण समुद्रवन्महान्। परन्तु शकुन्तला मनसो गभीरतायां समुद्रवती। दुष्यन्तस्य मनसि गाम्भीर्यं स्वल्पतया दृश्यते। अतः स षष्ठेऽङ्के सर्वदा विरहव्यथायामस्थिरो भवति। परन्तु शकुन्तलामनसि गाम्भीर्यं पूर्णतया दृश्यते। अतः सा विरहेऽपि हृदयसर्वस्वा। विरहव्यथासहमाना सा योगिनी इव शुद्धशीला अपि च "वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः"[15] इति।

---

[15] तत्रैव - ७।२१

पुरुषस्य मनसो विरहः सर्वदा प्रकाशितो भवति। परन्तु न नार्य्यः। अतो दुष्यन्यस्यापेक्षा अधिकविरहकातराऽपि शकुन्तला विरहे निर्लिप्ता। तस्याः विरहः सर्वदा हृदयाभ्यन्तरे निहितः। येन विरहेन जगतः कार्यं सर्वदा रक्षितं भवति स विरहः न कदापि बाह्यप्रत्यक्षग्राह्यः। शकुन्तलायाः मनसि वैपरीत्यमत्रैव प्रज्ज्वलितम्। शकुन्तलायाः मनसि अन्तर्लीनता अस्ति बाह्यविलीनता अपि तत्र प्रगाढरूपेण दृश्यते। चतुर्थेऽङ्के परिवेशसचेतनतायां बाह्यानुभूतेः प्रामाण्यं दृश्यते। शकुन्तलायाः मनसि आध्यात्मिकबुद्धिः सर्वदा समष्ट्यपेक्षा जगज्जडिता च। परन्तु दुष्यन्तस्य मनसि आध्यात्मिकबुद्धिः विचारशीला व्यष्ट्यपेक्षा च। यतोहि दुष्यन्तो गुरुजनवाक्यमतिक्रम्य स्वस्य व्यष्टिबुद्ध्या सिद्धान्तग्रहणे सक्षमो भवति। न तु शकुन्तला। अतः सा गुरुजनवाक्यमतिक्रम्य दुष्यन्तं प्रति आत्मसमर्पणे द्विधाग्रस्था भवति। अत्राशयो विद्यते यद्दुष्यन्तस्य सिद्धान्तो विचारशक्तिमूलकः। परन्तु शकुन्तलायाः सिद्धान्तो स्वमनसोऽभिव्यक्तिरूपः। अत्रापि तयोः वैपरीत्यं दृश्यते।

उपसंहारः- नाटके मनसो वैपरीत्ये दर्शने च जडत्वं सूक्ष्मत्वं च सर्वदा विद्यते। अर्थादेकत्र पुरुषशक्तिरपरत्र प्रकृतिशक्तिः। प्रकृत्यां जडत्वं पुरुषे सूक्ष्मत्वं च। अवस्थाविशेषे प्रकृत्यामपि सूक्ष्मत्वं दृश्यते। प्रकृतिपुरुषयोः मिलनं सर्वदा नियमाधीनं भवति अन्यथा अनिष्टमेव वर्तते। तयोः मिलने मनसा सह इन्द्रियशक्तिरपि आवश्यिकी। यत्र तु शक्तिद्वयमध्ये वैषम्यं दृश्यते तत्र कर्तव्यहानिः भविष्यति। अस्य फलं तु अभिशापः। अत्रापि नाटके पुरुषस्य मनसि आत्मगतभावनया सह सार्वजनीनता अस्ति। रमणीमनसि आत्मगतभावनैव प्रबलतया अस्ति सार्वजनीनता सर्वत्र नास्ति। तदर्थमभिशापः। परन्तु परिणामे तयो उभययोः मनसि आत्मगतभावनया सह सार्वजनीनता प्राधान्येन वर्तते। अत एकत्रे एव साम्यावस्था। वैषम्ये तु विषमावस्था इति सिद्धान्तः।

**ग्रन्थपञ्जी**


1. *अभिज्ञानशकुन्तलं कालिदासप्रणीतम्-* सम्पा. राजदेव मिश्र, घनश्यामदास एण्ड सन्स, फैजावाद, सं. १, २०००।
2. *अभिज्ञानशकुन्तलं कालिदासप्रणीतम्-* सम्पा. वासुदेवकृष्ण चतुर्वेदी, महालक्ष्मी प्रकाशन, आगरा, सं. ३, १९८१-८२।
3. *अभिज्ञानशकुन्तलं कालिदासप्रणीतम्-* सम्पा. शङ्कररामशास्त्री, बालमनोरमाप्रेस, माद्राज, १९४७।
4. *अभिज्ञानशकुन्तलं कालिदासप्रणीतम्-* सम्पा. हरिदाससिद्धान्तवागीशभट्टाचार्य, कलिकाता, सं. २, १८६० शकाब्द।